संस्कृत प्रचार पुस्तक माला सं० ३५

वेदामृतम्

[वेदों से चुने हुए कुछ वन्दना तथा प्रार्थनासम्बन्धी मन्त्र]

सार्वभौम संस्कृत प्रचार कार्यालय
वाराणसी

वेदामृतम्

ईश-वन्दना

हिरण्यगर्भः समवर्तताऽग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥

य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवाः।

यस्य छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम ॥

यः प्राणतो निमिषतो महित्वा
एक इद् राजा जगतः संबभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ॥

यस्येमे हिमवन्तो महित्वा
यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू
कस्मै देवाय हविषा विधेम ॥

येन द्यौरुग्रा पृथिवी च दृढा

येन स्वः स्तभितं येन नाकः ।

यो अन्तरिक्षे रजसो विमानः

कस्मै देवाय हविषा विधेम ॥

ऋग्वेद १०।१२१।१-५।

वाणी-वन्दना

पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
यज्ञं वष्टु धियावसुः ॥

ऋ० १।३।११

महो अर्णः सरस्वती प्रचेतयति केतुना ।
धियो विश्वा विराजति ॥

ऋ० १।३।१२

शिवा नः शंतमा भव सुमृडीका सरस्वती ।
मा ते युयोम संदृशः ॥

अथर्ववेद ७।६८।३

सद्बुद्धि की प्रेरणा के लिये प्रार्थना

गायत्री मन्त्र

ॐ भूर्भुवः स्वः
तत् सवितुर् वरेण्यं
भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

ऋग्वेद ३।६२।१०, यजुर्वेद ३६।३

3

सुख, शान्ति एवं कल्याण के लिये प्रार्थना

स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः
स्वस्ति नो वृहस्पतिर्दधातु ।।

पृषदश्वा मरुतः पृश्णिमातरः
शुभं यावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो
विश्वे नो देवा अवसा गमन्निह ।।

भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर् यजत्राः ।

स्थिरैरङ्गैस् तुष्टुवांसस् तनूभिर्
व्यशेमहि देवहितं यदायुः ॥

शतमिन्नु शरदो अन्ति देवा
यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति
मा नो मध्या रीरिषतायुर् गन्तोः॥

अदितिर् द्यौरदितिरन्तरिक्ष-
मदितिर् माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्चजना
अदितिर् जातमदितिर् जनित्वम् ॥

शु० यजुर्वेद अ० २५, १६-२२

द्यौः शान्ति रन्तरिक्षं शान्तिः पृथिवी
शान्तिरापः शान्ति रोषधयः शान्तिः। वनस्पतयः
शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।
यतो यतः समीहसे, ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥

शु० यजुर्वेद अ० ३६, १७, २८

ॐ शं नो मित्रः शं वरुणः
शं नो भवत्वर्यमा ।
शं न इन्द्रो वृहस्पतिः
शं नो विष्णुरुरुक्रमः ॥

ॐ शं नः सूर्य उरुचक्षा उदेतु
शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु
शं नः सिन्धवः शमु सन्त्वापः ।।

ऋ० १।६०।६ ऋ० ७।३५।८

प्रार्थना मन्त्र

सन्मार्ग पर ले चलने के लिये प्रार्थना

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम ।।

ऋग्वेद, १।१८।१

मेधावी होने के लिए प्रार्थना

यां मेधां देवगणाः, पितरश्चोपासते ।
तया मामद्य मेधयाऽग्ने मेधाविनं कुरु ॥
मेधां मे वरुणो ददातु, मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च, मेधां धाता दधातु मे ॥

अथर्ववेद ६।१०८।४, ५

मन में शुभ विचारों के उदय के लिये प्रार्थना

यत् प्रज्ञानमुत चेतो धृतिश्च
यज्ज्योति रन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते
तन्मे मनः शिवसंकल्पमस्तु ॥

सुषारथिरश्वानिव यन्मनुष्यान्
नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं
तन्मे मनः शिवसंकल्पमस्तु ॥

शु० यजुर्वेद ३४।३,६

पापों से बचाने के लिए प्रार्थना

विश्वानि देव सवितर्
दुरितानि परासुव ।
यद् भद्रं तन्न आसुव ॥

ऋग्वेद ५।३२।५

असत् से सत्, अन्धकार से प्रकाश तथा मृत्यु से अमृत की ओर ले चलने के लिए प्रार्थना—

असतो मा सद् गमय,
तमसो मा ज्योतिर्गमय,
मृत्योर् माऽमृतं गमय ।

28
बृहदारण्यक उप० १।३।~~१२~~

कायिक, वाचिक, मानसिक तथा आध्यात्मिक पवित्रता के लिये प्रार्थना

पृथिव्यापस्तेजोवायुराकाशा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासम् ।

शब्द-स्पर्श-रूप-रस-गन्धा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासम् ।।
मनो-वाक्-काय-कर्माणो मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासम् ।
आत्मा मे शुध्यतां
ज्योतिरहं विरजा विपाप्मा भूयासम् ।।

कृ० यजुर्वेद तैतिरीयारण्यक १०।६६

आ नो भद्राः क्रतवो यन्तु विश्वतो-
ऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे अस-
न्नप्रायुवो रक्षितारो दिवे दिवे ।।

ऋग्वेद १।८६।।१

पुरुष-सूक्त

ॐ सहस्रशीर्षा पुरुषः, सहस्राक्षः सहस्रपात् ।
स भूमि सर्वतः स्पृत्वाऽत्यतिष्ठद् दशाङ्गुलम् ।।

पुरुष एवेदं सर्वं, यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो, यदन्नेनातिरोहति ।।

एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि ।।

त्रिपादूर्ध्व उदैत् पुरुषः, पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत्, साशनानशने अभि ।।

ततो विराडजायत, विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत, पश्चाद् भूमिमथो पुरः ।।

तस्माद् यज्ञात् सर्वहुतः, सम्भृतं पृषदाज्यम् ।
पशूंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥

तस्माद् यज्ञात् सर्वहुत, ऋचः सामानि यज्ञिरे ।
छन्दांसि यज्ञिरे तस्माद्, यजुस्तस्मादजायत ॥

तस्मादश्वा अजायन्त, ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥

तं यज्ञं वर्हिषि प्रौक्षन्, पुरुषं जातमग्रतः ।
तेन देवा अयजन्त, साध्या ऋषयश्च ये ॥

यत् पुरुषं व्यदधुः, कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू, किमूरू पादा उच्येते ॥

ब्राह्मणोऽस्य मुखमासीद्, बाहू राजन्यः कृतः ।
ऊरू तदस्य यद् वैश्यः, पद्भ्यां शूद्रो अजायत ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद् वायुश्च प्राणश्च, मुखादग्निरजायत ॥

नाभ्या आसीदन्तरिक्षं, शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्,तथा लोकाँ२अकल्पयन्

यत् पुरुषेण हविषा, देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं, ग्रीष्म इध्मः शरद्धविः ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना, अबध्नन् पुरुषं पशुम् ॥

*यज्ञेन यज्ञमयजन्त देवा-
स्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ।
शु० यजुर्वेद ३२।१-१६

*सूचना— पुरुष सूक्त के मन्त्रों में ईश्वर की महिमा तथा उनके द्वारा जगत् की सृष्टि का वर्णन है। अनेक धार्मिक कृत्यों में इनका पाठ किया जाता है तथा इनके द्वारा षोडशोपचार पूजा भी की जाती है।

सर्वत्र अभय के लिये प्रार्थना

अभयं नः करत्यन्तरिक्षम्
अभयं द्यावापृथिवी उभे इमे ।
अभयं पश्चादभयं पुरस्ताद्
उत्तरादधरादभयं नो अस्तु ।।

अभयं मित्रादभयममित्राद्
अभयं ज्ञातादभयं पुरो यः ।
अभयं नक्तमभयं दिवा नः
सर्वा आशा मम मित्रं भवन्तु ।।

अथर्व. २१।१५।५-६
19/15-5-6

द्वितीय आवृत्ति : एक हजार

मूल्य : २५ न. पै.

कल्पना प्रेस रामकटोरा रोड, वाराणसी